जालेन किंकिणयः क्षुद्रघंटिकाः एकैकेन घंटाजालेन किंकिण्यपेक्षया किंचिन्महत्यो घंटाः एकैकेन मुक्ताजालेन मुक्ताफलमयेन दामसमूहेन एकैकेन मणि
जालेन मणिमयेन दामसमूहेन एकैकेन कनकजालेन कनकं पीतरूपः सुवर्णविशेषस्तन्मयेन दामसमूहेन एकैकेन रत्नजालेन रत्नमयदामसमूहेन अत्रत्य
जाता गाथा अत्र जातानि रत्नानीति रत्नमणयोर्भेदः एकैकेन सर्वरत्नमयपद्मजालकेन दामसमूहेन सर्वतः समन्तादिति प्राग्वत् संपरिक्षिप्ता, एतानि च दाम

तथाभि हेमजालादीनि जालानिलम्बमानानिवेदितव्यानि । तथाचाह तेषांजालाद्यन्यत्रपुंस्कनिर्देशः प्राकृतत्वात्तेन तानिजालानि तपनीयमारक्त सु वर्णलम्बपोलम्बूसगोदाप्रायविभागेमण्डनविशेषो येषांतानितथा, पार्श्वतः सामस्त्येन सुवर्णस्य प्रतारकेणपत्रेणमण्डितानि अन्तरा अन्तरालस्कमाल हेमपत्रकालंकृतानि, तथा नानारूपाणांजातिभेदेनानेकप्रकाराणां मणीनांरत्नानांचये विचित्र वर्णाहारा अष्टादशसरिका अर्द्धहारानवसरिकास्तैरुप शोभितः समुदायोयेषांतानि, तथा ईषन्मनाक् अन्योन्यं परस्परमसंप्राप्तानि असंलग्नानि पूर्वापरदक्षिणोत्तरागतैर्वातैर्मंदायं मन्दायमिति मन्दंमन्दं एजमानानि कम्प्यमानानि भृशाभीदण्यादिविच्छेदैहिः प्रोक्तमयादेरित्य विच्छेदैर्द्विर्वचनं यथा पचतिपचतीत्यत्र । एवमुत्तरत्रापि ईषत्कंपनवशादेव प्रकर्षेत इतस्ततोमनाक् चलनेन लम्बमानानि २ उदारेण स्फारेणशब्देनेतियोगः । सचस्फारशब्दोमनः प्रतिकूलोपि भवति ततआह । मनोज्ञेनमनोनुकूलेन स शुमनोनुकूलत्वं लभतेपिस्यादतआह । मनोहरेण मनांसिश्रोतृणां हरति आत्मवशंनयतीति मनोहरोलिहादेराकृति गणत्वादच् प्रत्ययः, तेन तदपिम मोहरत्वंकुत इत्याह । कर्णमनोनिर्वृत्तिकरेण निमित्त कारणहेतुषुसर्वासां विभक्तीनां प्रायोदर्शनमिति वचनात् हेतौतृतीया, ततोयमर्थः प्रतिश्रोतृकर्णे योर्मनसश्चनिर्वृतिकरः सुखोत्पादकस्ततोमनोहरस्तेनइत्थंभूतेनशब्देनतान् प्रत्यासन्नान् प्रदेशान् सर्वतः समन्तात् आपूरयन्ति २ शुभमन्ययोतस्यशा विदंरूपं । अतएव श्रियाशोभया अतीव उपशोभमानानि २ तिष्ठंति पुनरस्यांपद्म तदुपदर्शयति । तस्याः पद्मवरवेदिकायाः तत्रतत्रदेशेतहिं तहिं इति सर्वेषदेशस्य तत्र तत्र एकदेशे एतावता किमुक्तं भवति पद्मदेशैकस्तत्राप्येपि विप्रलक्षति महयोहयसंघाटा अपिद्वाभ्याः । एतेषुसर्वेसर्वात्मनारत्न मयाः अच्छायावत् प्रतिरूपाइत्यादि सर्वंप्राग्वत्, एतेषमर्वंपि हयसंघाटादयः संघाटाः पुष्पावकीर्णका उक्ताः । सम्प्रत्येषामेवहयादीनां पंक्त्यादि प्र तिपादनार्थमाह । एवमिति यथाऽमीषांहयादीनां महानांसंघाटाउक्ताः तथापंक्तयोपिवीथ्योपि मिथुनकानिच यान्यानि तानि चैवं,तीमेवं पउमवरवेइ याए तत्थतत्थदेसेतहिं २ वहुआतं हयपंतीओ गयपंतीओ इत्यादि नवरमेकस्यांदिशिया श्रेणिः सापंक्तिरभिधीयते, उभयोरपिपार्श्वयोरेकैकश्रेणिभा वेनयत् श्रेणिद्वयंसावीथी, एतेषवीथीपंक्ति संघाटा हयादीना पुरुषाणामुक्ताः । सांप्रतमेतेषामेवहयादीनां स्त्रीपुरुषयुग्मप्रतिपादनार्थं मिथुनाई हयमु क्तं उक्तेनैव प्रकारेणहयादीनां मिथुनकानि स्त्रीपुरुष युग्मरूपाणिवाच्यानि, यथा-तत्थतत्थदेसेतहिं तहिं वहुआइ हयमिहुणाई इत्यादि । सीमेतामित्था

[illegible] [illegible] वृद्धे ३ [illegible]

[illegible] मताः [illegible] नहिं नहिं इति, [illegible] कदेशे । तथापि [illegible] नहिं नहिं इति [illegible] लता स
[illegible] कर्माणि [illegible] । बहुः [illegible]ताः पत्रिमः [illegible]ताः [illegible] [illegible]भावात् मा
[illegible] । [illegible]ताः [illegible] [illegible] [illegible]ताः [illegible]ताः [illegible] इत्यादि । नित्यं
[illegible] कुसुमिताः कुसुमानि [illegible] इति कुसुमिताः तारकादिदर्शनादित्वात् प्रत्ययः । एवं नित्यं मुकुलिताः मुकुलानि [illegible]
[illegible] इत्यर्थः, यथा नित्यं [illegible] [illegible] [illegible] इत्यर्थः, तथा नित्यं [illegible]किताः
[illegible], तथा नित्यं [illegible]ताः [illegible] गुल्माः [illegible] तथा नित्यं गुच्छिताः संजातगुच्छाः गुच्छ[illegible] । [illegible]
[illegible] विशेषोऽयं । नित्य[illegible] [illegible] सजातीयपर्णैः सह [illegible] नित्यं
[illegible] तथा नित्यं [illegible] नित्यं [illegible] विशेषेण [illegible] प्रापिताः, तथा नित्यं प्रणमिता
[illegible] इत्यादि । नित्यं [illegible] इत्यादि । [illegible] [illegible] प्रति विशिष्टो मंजरी
[illegible] मंजरी [illegible] [illegible] [illegible]
[illegible] । [illegible] कुसुमित इत्यादिपदं प्रति
[illegible] । [illegible] । नित्यं कुसुमित मुकुलित [illegible] [illegible] गुच्छित [illegible] प्रणमित सुविभक्त प्रतिमंजरी
[illegible] इति, [illegible] इत्यादि [illegible] प्राप्ताः, [illegible] इत्यादि
[illegible] । [illegible] पुष्पति । [illegible]
[illegible] इति, [illegible] [illegible] किंतिमि
[illegible] [illegible] [illegible] [illegible] चैत्यानाशी

सूचीभ्यां फलकानि इति, वेदिके वेदिका पुरुषैषा अन्तराणि तेषु, अंगेषु नानाप्रकाराः तामयानाम् मामयानीषु मानाशीर्षेषु, छोलानो सांपुटीयो यंत्र तानि तेषु सूचीमुखकनकमयमविधनाभावहेतुपादुकास्थानीयानाम् नानामुपरि इति तात्पर्यार्थः, सूचीमुखेषु यत्र प्रदेशे सूची फलकमित्यागमध्ये प्रविशति तत्पुरुषाकोटेराः सूचीमुखं तेषु, तथा सूचीफलकेषु सूचीभिः सम्बन्धिताधिफलकप्रदेशास्तेपूपचारात् सूचीफलकानि तेषु सूचीनामधमुपरिच वर्त्तमा नेषु, तथा सूचीपुटान्तरेषु द्विसूच्यौ सूचीपुटान्तरा मन्तरेषु, पक्षाः पक्षबाहा वैदिकैकदेशविशेषाः तेषु बहूनिउत्पलानि गर्दभकानि चंपकीलानिया पद्मा नि सूर्यविकासीनि ईषच्छ्वेतानिवा नलिनानि ईषद्रक्तानि कुमुदानि चंद्रविकासीनि सुभगानि पद्मविशेषाः सौगन्धिकानि कह्लाराणि पुंडरीकाणि श्वेत पद्मानि तान्येव महापुंडरीकाणि शतपत्राणि दलशतकलितानि सहस्रपत्राणि सहस्रदलकलितानि एतौघपद्मविशेषौ पत्र सङ्ख्याविशेषात् पृथगुपात्तौ सर्वरत्नमयानि श्वेतानि अच्छे त्यादिविशेषणानि प्राग्वत्, महांति महाप्रमाणानि वार्षिकाणि वर्षाकाले पानीयरक्षणार्थं यानिकृतानियार्षिकानितानि च्छत्राणि च्छत्राणिव तत्समानानि प्रज्ञप्तानि, हे श्रमण-तपःप्रवृत्त हे आयुष्मन्-प्रशस्तजीवित से एएणट्ठेणमित्यादि तदेतेनार्थेनान्वर्थेन-गौतम-एवं मुच्य ते पद्मवरवेदिका पद्मवरवेदिकेति तेषुतेषु यथोक्तरूपेषु यथोक्तरूपाणिपद्मानि पद्मवरवेदिकाशब्दस्य प्रवृत्तिनिमित्तमिति भावः । व्युत्पत्तिरेवं पद्म प्रधाना वेदिका पद्मवरवेदिकेति । अथापरमप्रवृत्तिनिमित्तं किं तदित्याह । पद्मवरवेदिकायाः शाश्वतंनामधेयं प्रज्ञप्तमिति, अयमभिप्रायः प्रस्तुतपद्म वरवेदिकेवे पद्मवरवेदिकेति शब्दस्य निमित्तनिरपेक्षाऽनादिकालीनारूढिः प्रवृत्तिनिमित्तमिति । पद्मवरवेइयाणंभन्तेति, पद्मवरवेदिकाशाश्वती उ ताऽशाश्वती प्रत्ययेहीनया इत्यनेन प्राकृतसूत्रेण दीप्रत्ययस्यैकल्पिकत्वेन आवंततया सूत्रेनिर्देशः किंनित्याउताऽनित्येतिभावः । भगवानाह-गौतम स्याच्छाश्वतीस्यादशाश्वती कथंचिन्नित्या कथंचिदनित्येत्यर्थः । स्याच्छब्दोनिपातः कथंचिदित्येतदर्थवाची।एतदेवसविशेषंजिज्ञासुः पृच्छति । से केणट्ठेण मित्यादि, सेशब्दोऽथशब्दार्थः अथ प्रश्ने केनार्थेन कारणेन भदन्त एवमुच्यते यथा स्याच्छाश्वतीस्यादशाश्वतीति।भगवानाह-गौतम द्रव्यार्थतयाशाश्व ती तत्रद्रव्यं सर्वत्रान्वयिसामान्य मुच्यते द्रवतिगच्छतितान् तान् पर्यायान् विशेषानितिवा द्रव्यमितिव्युत्पत्तेः, द्रव्यमेवार्थस्तात्विकः पदार्थप्रतिज्ञायां यस्य सद्भावा:, तद्व्यार्थः द्रव्यमात्रास्तित्व प्रतिपादको नयविशेषस्तद्भावो द्रव्यार्थता तया द्रव्यमात्रास्तित्व प्रतिपादकनयाभिप्रायेणेति यावत्, शाश्व

ती द्रव्यार्थिकनयमतपर्यालोचनया शुक्लरूपत्र पद्मवरवेदिकाया आकारस्य सदाभावात्, तथान्यैरन्यैः कृष्णादिभिः वर्णपर्यायैः सुरभ्यादिभिः गन्ध पर्यायैः तिक्तादिभिः स्पर्शपर्यायैः कठिनत्वादिभिः अशाश्वती अनित्या तेषां वर्णादीनां प्रतिक्षणं किञ्चित् कालान्तरेण अन्यथा अन्यथाभवनात्, नन्व द्वयस्यास्यवानित्यत्वात्, ननु एकस्मिन्नधिकरणे नित्यत्वाऽनित्यत्वे द्रव्यपर्याययो र्भेदाभेदो यस्मात्, अन्यथा उभयोरप्यसत्त्वापत्तेः, तथाहि-परस्परे व तु परपरिकल्पितं द्रव्यमसत् पर्यायव्यतिरिक्तत्वात्, वान्ध्यादिपर्यायशून्यवन्ध्यासुतवत्, तथा-परपरिकल्पिताः पर्याया असन्तो द्रव्यव्यतिरिक्तत्वात् व न्ध्यासुतगतबाल्यादिपर्यायवत् । उक्तं च द्रव्यं पर्यायवियुतं पर्याया द्रव्यवर्जिताः । क्व कदा केन किंरूपा दृष्टा मानेन केन वा ॥ १ इति कृतं प्रसङ्गेन, सैषानन्तरो क्तनित्यादुपसंहारवाक्यं गुणनं । इह द्रव्यास्तिकनयवादी स्वमतप्रतिष्ठापनार्थमेवमाह । नास्त्यसत उत्पादो नास्तिनो विनाशोऽस्ति नासतो विद्यते भावो नाभावो विद्यते सत इति वचनात्, यौतुदृश्यते प्रतिवस्तु उत्पादविनाशौ तावाविर्भावतिरोभावमात्रं यथा सर्पस्य उत्फणत्वविफणत्वे, तस्मात् सर्वं वस्तु नित्यमिति । एवं च तन्मतचिंतायां संशयः किं घटादिवत् द्रव्यार्थतया शाश्वती उत सकलकालमेवं स्थितेति, ततः संशयापनोदार्थं भगवन्तं भूयः पृच्छति । पउमवरवेइयाणमित्यादि पद्मवरवेदिका चमिति पूर्ववत् । भदंत-परमकल्याणयोगिन् कियच्चिरं कियन्तं कालं यावद्भवतीति पृष्टः कियन्तं कालं भवतीत्युक्ते इति, भगवानाह-गौतम कदाचिन्नासीत् सर्वदैवासीदिभावः । अनादित्वात्, तथा न कदाचिन्न भवति सर्वदैव वर्तमानकालचिन्तायां भवतीति भावः । सदै वभावात्, तथा न कदाचिन्न भविष्यति किंतु भविष्यच्चिंतायां सर्वदैव भविष्यतीति प्रतिपत्तव्यं । अपर्यवसितत्वात्, तदेवं कालत्रयचिंतायां नास्तित्वप्रतिषेधं कृत्वा अस्तित्वं प्रतिपादयति । भुविंचेत्यादि । अभूच्च भवति च भविष्यति चेति एवं त्रिकालावस्थायित्वात् ध्रुवा मेर्वादिवत् ध्रुवत्वादेव सदैव स्वरूपे नियता नियतत्वादेव शाश्वती शश्वद्भवनस्वभावा, शाश्वतत्वादेव सततं गंगासिन्धुप्रवाहे प्रवृत्तावपि पौण्डरीकद्रह इवानेकपुद्गलविघटनेऽपि तावन्मात्रान्यपुद्गलोच्चटनसंभवात्, अक्षया नविद्यते क्षयो यथोक्तस्वरूपाकारपरिभ्रंशोऽस्याः सा अक्षया अक्षयत्वादेवाऽव्यया, मनागपि स्वरूपचलनस्य जातु विद्यमानत्वात्, अव्ययत्वादेव स्वप्रमाणे अवस्थिता मानुषोत्तरपर्वताद्बहिः समुद्रवत्, एवं स्वस्वप्रमाणेऽवस्थानेन चिंत्यमाना नित्या धर्मास्तिकायादि वत् । अथ जगत्या उपरि पद्मवरवेदिकायाः परतो यदस्ति तद्दर्शयति । तस्याश्चमिति प्राग्वत् जगत्या उपरि पद्मवरवेदिकायाः बहिः परतोऽत्र एगे च

॥ टीका ॥

स्मिन् सनिलि पूर्वम् महानीलोत्पलवर्ण प्रज्ञप्तः, अनेकजातीयानां सुमनसां महीरुहाणां वनखण्डः। पद्मानां गुणजातिसुधिं हरकेहिं वणं अशोगत्र शाखि उनधेहिं सरकेहि वन कहेति । तत्र वनखंडो देशोने किंचिदूने द्वियोजने विष्कम्भो विस्तारतः, देशश्चात्र सार्द्धधनुः शतद्वयरूपो ऽवगंतव्यः । तथाहि-चतुर्योजनविस्तृतशिखरकाया जगत्या बहुमध्यभागे पंचधनुःशतप्रमाणा पद्मवरवेदिका तस्याश्च बहिर्भागे वर्णितवनखंडो ऽपरपार्श्वभागे, अतोजग तीविष्कम्भविस्तारे वेदिकाविस्तारपंचशत धनुर्वर्जे ऽर्द्धक्रियमाणे यथोक्तं मानं लभ्यत इति । तथा जगती समक एव जगतीसमको जगती तुल्यः परिक्षेपेण परिरयेण, वनखंडवर्णकः सर्वोऽपि प्रथमोपांगगतोऽनेनाप्यः स्मृतिपथं प्रापणीयः । गुणायंकिण्हेकिण्होभासे नीले नीलोभासे हरिए हरिओभासे सीए सीओभासे णिद्धे णिद्धोभासे तिव्वे तिव्वोभासे किण्हे किण्हच्छाए नीले नीलच्छाए हरिए हरियच्छाए सीए सीअच्छाए णिद्धे णिद्धच्छाए तिव्वे तिव्वच्छाए घणकडियकडच्छाए रम्मे महामेहणिकुरंबभूए तेणं पायवा मूलमंतो कंदमंतो खंधमंतो तयामंतो सालमंतो पवालमंतो पत्तमंतो पुप्फमंतो फलमंतो बीअ मंतो अणुपुव्वसुजायरुइलवट्टभावपरिणया एगखंधी अणेगसाहप्पसाहविडिमा अणेगणरवामसुप्पसारियागेज्झघणविउलवट्टखंधी अच्छिद्दपत्ता अ विरलपत्ता अवाईणपत्ता अणोईअपत्ता निद्धूयजरढपंडुरपत्ता णवहरियभिसंतपत्तभारंधयारगंभीरदरिसणिज्जा उवणिग्गयनवतरुणपत्तपल्लवकोम लउज्जल चलंत किसलय सुकुमालपवालसोभियवरं कुरग्गसिहरा णिच्चं कुसुमिया णिच्चं मउलिया णिच्चं लवइया णिच्चं थवइया णिच्चं गुलइया णिच्चं

॥ मूल ॥

तीसेणं जगईए उप्पिं बाहिं पउमवरवेइयाए एत्थणं महंएगे वणसंडे पण्णत्ते ? देसू णाइं दोजोयणाइं विक्खंभेणं जगईसमए परिक्खेवेणं, वणसंडवण्णओ णेयव्वो ॥

॥ अनुवाद ॥

तस्या जगत्या उपरि बहिःपद्मवरवेदिका अत्र महानेकोवनखण्डःप्रज्ञप्तः,देशोने द्वे योजने विष्कम्भेन जगतीसमः परिक्षेपेण वनखण्डवर्णको, नेतव्यः

॥ भाषा ॥

तोतेनं तेजगतीनें ऊपर,उपरन्नेभागें ॥ बाहिरपाशे पद्मवरवेदिकाने बहिर्लेपाशे (वेदिकानें वेपासें)॥ एत्थणं० इहां एकमोटो वनखंड वृक्षसमूह कह्यो तीर्थंकरे ॥ देसूणा० देशउणा कांइ उणा बेयोजन विक्खंभपणे ॥ जगइ० जगतीने समानपरिधपणेहै वणसंड० वनखंडवर्णन उवाइसूत्रथी विशेषजाणवो

गुल्मिया णिच्चं जमलिया णिच्चं जुअलिया णिच्चं विणमिया णिच्चं पणमिया णिच्चं कुसुमिअ मउलिअ लवइअ थवइअ गुलइअ गोच्छिअ जमलिअ जुअलि
विणमिअपणमिअ सुविभत्तपडिमंजरिवडिंसयधरासु सुयबर्हिणमयण सालागकोइलकोरगभिंगारक कोंडलक जीवं जीवगणं दीमुह कविल पिंगल रक्खग
रंडगद्वाय कलहंस सारस अणेगसउणगणमिहुणविरइअ सद्दुण्णइअ महुर सरणाइ आसुरम्मासंपिंडि अदरिअभमरमहु आरिपहकरपरिलिंतमत्त छप्पय कुसु
मासवलोलमहुरगुमगुमंतगुंजंतदेसभागा अब्भिंतर पुप्फफला बाहिरपत्तच्छन्ना पत्तेहि पुप्फेहि य उच्छन्नपलिच्छन्ना णीरोगया अकंटया साउफलाणागारा
गुच्छगुम्ममंडवगसोहिया विचित्तसुहकेउभूयावाविपुक्खरिणी दीहीयासु नि वेसियरम्मजालघरया पिंडिमनीहारिमंसुगंधिंसुहसुरभिमणहरं च महया
गंधद्धुणिं मुयंता णाणाविहगुच्छगुम्ममंडवगघरगसुहसेउकेउबहुला अणेगरहजाणजुग्गसिबिअ अमंदमाणिआ पविरला अणापागादीया जाव पडिरूवाइति। अत्रव्याख्या इह प्रायोमध्य
वयसि वर्तमानानि पत्राणि कृष्णानि भवंति ततस्तद्योगाद्वनषंडोपि कृष्णः। न चोपचारमात्रतः कृष्णइति व्यपदिश्यते किंतु तथा प्रतिभासनात्, तथाह
कृष्णावभासः यावति भागे कृष्णानि पत्राणि संति तावति भागे वनषंडो कृष्णोऽवभासते प्रतिभाति द्रष्टॄणां लोचने पथइति, कृष्णोऽवभासो यस्य स कृ
ष्णावभासः। तथा प्रदेशान्तरे नीलपत्रयोगाद्वनषंडोपि नीलः, स्वयं नीलावभासः तथा प्रदेशांतरे हरितो हरितावभासश्च, तत्र नीलो मयूर कंठवत् हरितस्तु
कपिच्छवत् हरितालाभइति वृद्धाः तथा प्रायोदिनकर कराणां सप्रवेशाद्वृक्षाणां पत्राणि शीतानि भवंति तद्योगात् वनषंडोपि शीतः। न चायमुपचार
मात्र इत्यत आह। शीतावभासइति अधो वर्त्तिव्यंतरदेवदेवीनां तद्योगशीतस्पर्शतः शीतो वनषंडो ऽवभासते, तथाऽऽत्मते कृष्णनीलहरितवर्णा यथा
स्वस्मिन् स्वरूपे अत्यर्थं मुत्कटाः स्निग्धाः भवंति तीव्राश्च ततस्तद्योगाद्वनषंडोपि स्निग्धस्तीव्रश्चोक्तः। न चैतदुपचारमात्रं किंतु प्रतिभासोपि, ततः
स्निग्धावभासस्तीव्रावभास इति। इह चावभासो भ्रांतोपि स्याद्यथा मरुमरीचिकासु जलावभास ततोनावभासमात्रो पदर्शने यथावस्थितं वस्तुस्वरूप
वर्णितं भवति। किंतु तथा स्वरूपप्रतिपादनेनततः कृष्णत्वादीनां तथा स्वरूप प्रतिपादनार्थं मनुवाद पुरस्सरं विशेषणांतरमाह। किन्त्वित्यादि कृ
ष्णवनषंडः कृष्ण इत्याह। कृष्णच्छायः। निमित्तकारण हेतुषु सर्वासां विभक्तीनां प्रायोदर्शनमिति वचनात् हेतौ प्रथमा, ततोयमर्थः यस्मात् कृष्णच्छाया अ
तः सर्वाविसंवादिसपातस्यास्ति तस्मात् कृष्णः। एतदुक्तं भवति सर्वाविसंवादिनयात्र कृष्ण आकारउपलभ्यते तथाऽवतावभाससंपादितस्ताक

...भावस्थापित इति । एवंनीलानीलच्छाय इत्यादावपि भावनीयं । नवरं शीतः शीतच्छाय इ कोविदोभवति ... कटिरियकटिरित्युच्यते कटिसटमिव मध्यभागः कटिसतो ऽन्यस्यापि मध्यभागः ... इति । वृक्षशरीरस्य मध्यभागे कटितटच्छायः मध्यभागेनिबिडतरच्छाय इत्यर्थः । यावमांतरेपण ... कटितटे मध्यभागे छायायस्य घनकटितटच्छायः ... घना निबिडा कटितकटस्येवाधो भू कटितटे ... कटितः कटांतरेणोपपरिवृत इत्यर्थः कटितयासीकटस्य कटितकटः घना निबिडा ... मेघसमूहस्तथाभूतोगुणैः प्रातोम ... कटः संजातोऽस्येति कटितः ... तथामहान् जलभारायनतः प्रावृट्कालभावी यो मेघनिकुरंबो ... प्रभूतानि दूरावगाढानिच संस्थेपामिति ... अतएवरम्योरमणीयः ... मूलमंत इत्यादीनि दशपदानि सप्रमूलानि प्रभूतानि ... शाखा प्रवालः पल्लवांकुरः प ... । मूलमंत ... कन्दाः स्कंधः सूर्ध्वंयातामूलशाखाः प्रभवन्ति ... आनुपूर्व्या मूलादिपरिपाट्या सुष्टु जाताः आनुपूर्वीसुजाताः रु ... तानिमूलानि तेषामुपरिवर्तिनः कन्दाः ... (क्वचिद्भूमि)मतुप् प्रत्ययः । अनुपुर्विति आनुपूर्व्या ... शाखादिभिः प्रसृता यथावत् ... बीजानि ... सर्वशातिशयाने ... वृत्तभावेन परिणता वृत्तभावपरिणताः । किमुक्तं भवति एवंनामसर्वासुदिक्षु ... एकस्कंधी इति सूत्रपाठः अनेकाभिः शाखा ... प्रत्येकमेक स्कंधाः प्राकृतेषास्य ... पुरुषस्यामैः सुप्रसारितैः ... तथा तिर्यग्वाहुद्वय प्रसारण प्रमाणोत्थाम ... तथा, ... मध्यभागे विटपो विस्तारोयेषांते तथा, ... अच्छिद्रपत्राः किमुक्तं भवति नतेषांपत्रेषु वातदोषतः कालदोषतोवा ... विपुलो विस्तीर्णः स्कंधो येषांते तथा. अच्छिद्राणिपत्राणियेषांते ... पत्राणिपत्राणा सुपरिजातानि येन ... । अथवा एवंनामान्योन्यंशाखाप्रशाखासु प्रवेशात् पत्राणिपत्राणा सुपरिजातानि येन ... अविरलपत्राइति अत्रहेतौ प्रथमा ततोऽयमर्थः यतोऽविरलपत्रा अतोअच्छिद्रपत्राः ... कुतइत्याह । अविरलपत्रा इति ... अवाचीनानि पत्राणि ... अच्छिद्रपत्रा ...

कमलगत्यामावेदयन्नाह । कमनीयपत्राइति नविष्णे वृंतिसंहरिकादिग्गावेणुनाम्यनीतीति अमीतिनियत्राणि येषां ते तथा अमीतिपत्रत्वाच्चाच्छिद्रपत्राः तथा निर्धूतानि अपनीतानि जरठानि पुराणान्यारक्तकांशानि ततएवपांडुराणि पत्राणि येषां ते तथा । अथमायय: यानि वृन्तान्यानि उत्करवत्याणि पत्राणि तानि वातेन निर्धूय २ भूमौपात्यंते ततोविष प्रायोनिर्धूतानि याम्यत्रापमायेत इति तथा, नवेनशत्रुकेन हरितेन शुकपिच्छाभेन ततएवभासमानेन त्रिग्धतया दीप्यमानेन पत्रभारेण दृमसंचयेन योऽसौ ऽधकारस्तेन गम्भीरा अव्यक्तमध्यभागाः मनोदर्शनीयाः नवहरितभासमानपत्रभारांधकारगम्भीरदर्शनीयाः तथा उपविनिर्गतैर्निरंतरविनिर्गतैर्नवतरुणपत्रपल्लवै तथा कोमलैर्मनोज्ञैरुज्ज्वलैः शुद्धैर्यमानैरीषत्कंपमानैः किशलयैरवस्थाविशेषोपेतैः पत्रविशेषैस्तथा सुकुमारैः प्रवालैः पल्लवांकुरैः शोभितानि वरांकुराणि वरांकुरोपेतानि अग्रशिखराणि येषां ते तथा इह पल्लवांकुरप्रवालयोः कालकृताय स्थाविशेषाद्विशेषो भावनीय इति । चित्रं कुसुमिया इत्यादिकं वर्द्धमानपदार्थं सूत्रं पूर्ववद्व्याख्येयं, तथा शुकबर्हिणमदनशालाकाकोकिल कोरकभृंगारक कोंडलक जीवंजीवक नंदीमुख कपिल पिंगलाक्ष कारंडव चक्रवाक कलहंस सारसानामनेकेषां शकुनिगणानां पक्षिकुलानां मिथुनैः स्त्रीपुंसयुग्मैर्विरचितं शब्दोन्नतिकशब्दोन्नमधुरस्वरं नादितं लपितं येषु ते तथा, अतएव सुरम्या अतिमनोज्ञाः अत्र शुकाः कीराः बर्हिणाः मयूराः मदनशालाकाः सारिकाः, कोकिल चक्रवाक कलहंस सारसाः प्रतीताः शेषास्तु जीवविशेषाः लोकतोऽवसेयाः संपिंडिता एकत्रपिंडीभूता दृप्ता मदोन्मत्ततयाद्ध्मा भ्रमरमधुकराणां पहकराः संघाताः यत्र तेतथा तथा परिलीयमाना अन्यत आगत्यागत्याश्रयंते मत्ताः षट्पदाः कुसुमासवलोलाः किंजल्कपानलंपटा मधुरं गुमगुमायमाना गुंजन्त अव्यक्तविशेषं विरुवन्तो देशभागेषु येषां ते तथा ततःकर्मधारयपदिमानः, ततोभूयः पूर्वपदेन सह विशेषणसमासः, तथा अभ्यंतराण्यंतर्वर्तीनि पुष्पफलानि येषां ते तथा, तथा बहिः पत्रैः छन्ना आच्छादिताः तथा पत्रैश्च पुष्पैश्च छन्ना परिच्छन्ना एकार्थिकशब्दद्वयोपादानात् अत्यन्तमाच्छादिताः । तथा नीरोगका रोगवर्जिता नृपतिविकिरणा शाखासु येषां प्रतिक्रिया तैः रोगैः स्वतएव विरहिता इत्यर्थः । तथा ऽकंटका मध्ये नाभिकावयोद्दय मल्लीविनाशः । तथा नानाविधगुच्छगुल्मैः स्निग्धफला इत्यपि क्वचित्, नानाविधैर्गुच्छैः वार्ताकीप्रभृतिभिर्गुल्मैर्नवमल्लिकादिभिर्मंडपकैर्द्राक्षामंडपकैः शोभिताः पक्षध्वजैश्चादिभिर्मंजिता इत्यर्थः । तथा विचित्र शुभकेतु भूता इति, विचित्रान् शुभान् केतून्

॥ टीका ॥

ध्वजात् प्रायाः विचित्रसुवृक्षैवबहुला इतिपाठांतर, तत्र यथा तत्र शुभमंगलभूतः फंतु... क्षाम्रास्तथा वाप्यश्चतुरस्राकारास्ताएव वृत्ताः पुष्करिण्यः दीर्घिका ऋजुसारिण्यः तासुसुनिवेशितानिरम्याणिजालगृहकाणि यत्रतें तथा । अयमर्थः यत्रतेषुता आसन्नाः सूत्रवाप्यादिपुगवाक्षवन्तिगृहाणि व्यंतरमिथुनानां जलकेलिकृते वहूनि संतीति, पंडिमनिर्हारिमां पुद्गलसमूहरूपां दूरदेशगामिनींच सुगंधिं सद्गंधिकां शुभसुरभिर्योगंधान्तरेभ्यः पृथकाशान्मनोहरावा सा तथा तांच महतामोचनप्रकारेण प्राकृतत्वाद्वाद्वितीयार्थे तृतीया महती मित्यर्थः । गंधघ्राणिं यावद्भिर्गंधपुद्गलैर्घ्राणेंद्रियस्य तृप्तिरुपजायते तावती पुद्गलसंहति रुपचारा द्गंधघ्राणिरित्युच्यते तांनिरंतरंमुंचंत इत्यर्थः, तथा शुभाः प्रधानाः सेतवोमार्गाः आलवालपाल्योवा केतवो ध्वजबहुला अनेकरूपावेपान्ते तथा रथाः क्रीडारथादयः यानानि उक्तवक्ष्यमाणातिरिक्तानि शकटादीनि वाहनानि युग्यानि गोल्लविषयप्रसिद्धानि द्विहस्तप्रमाणानि चतुरस्रवेदिकायुतानि नरयानानि शिबिकाः कूटाकारेणाच्छादिताः जंपानविशेषाः स्यंदमानिकाः पुरुषप्रमाणजंपानविशेषाः अनेकेषांरथादीनामधोविस्तीर्णत्वारप्रविमोचनं येपुतें तथा, पासादीया इत्यादि प्राग्वत् । अथ वनषंडस्य भूमिभागवर्णनमाह । तस्यणमिति पूर्ववत् वनषंडस्यांत मंध्येवहु अत्यंतं समोवहुसमः सचासौरमणीयश्च सतथा भूमिभागः प्रज्ञप्तः । कीदृश इत्याह । से इति तत् सकललोकप्रसिद्धं यथेति दृष्टांतोपदर्शने मामेति शिष्यामंत्रणे एइति वाक्यालंकारे, आलिंगोमुरजो वाद्यविशेष स्तस्य पुष्करंचर्मपुटकं तदतिसमत्वात्यंतसममिति तेनोपमाक्रियते, इतिशब्दाःसर्वेपिस्वस्वोपमाभूतवस्तुसमाप्तिद्योतकाः वाशब्दाः समुच्चये यावच्छब्देन बहुसमत्ववर्णकोमणिलक्षणवर्णकश्च ग्राह्य इति । सचायं सुत्रंग

॥ मूल ॥

तस्सणं वणसंडस्स अंतो बहुसमरमणिज्जे भूमिभाए पणत्ते? सेजहाणामए आलिंगपुक्खरेइवा जाव

॥ अनुवाद ॥

तस्य वनखण्डस्यान्त र्बहुसमरमणीयो भूमिभागः प्रज्ञप्तः. सयथा-नामकः आलिङ्गपुष्करमिव यावत्

॥ भाषा ॥

तसंःतेवनषंडनइ मध्यइं अत्यंतसम रमणीक मनोहर भूमी भाग कह्यो तीर्थंकरइं । सेःसे दृष्टांते करी कहै छइ जिमकोईक आलिंगतेमादलप्रमुख वाजो तेहनां चर्मपुट जेहवोसमरमणीक कह्यो इमजो छे । जापूर्वे तीपरइ, (आठा आठावर्ने परेत ना नोमलछे वो ततीछे पसी ढेमांजो तोम ताछे)

जंबूद्वीप

आगमाद्य

६

पुष्करै इवा भरतले इवा करतले इवा चंद्रमंडले इवा सूरमंडले इवा आदंस मंडले इवा उरब्भचम्मे इवा वसहचम्मे इवा वराहचम्मे इवा सीह[illegible]
इवा वग्घचम्मे इवा छगलचम्मे इवा दीविचम्मे इवा अणेगसंकुकीलगसहस्सवितते आवडपच्चावडसेढिपसेढिसोत्थिय सोवत्थिय पूसमाणवद्ध[illegible]
मच्छंडक मगरंडक जारमार फुल्लावलिय पउमपत्त सागरतरंगवासंती पउमलयभत्तिचित्तेहिं सच्छाएहिं सप्पभेहिं समरीइएहिं सउज्जोएहिं इति । [illegible]
आलिंगपुष्करं लोकप्रतीतो मर्दलस्य पुष्करं मृदंगपुष्करं तथापरिपूर्णपानीयेन पूर्णं तडागं सरस्तल्लमुपरितनोभागः सरस्तलं अथवा [illegible]
प्रतिचलितिति निश्चितं जलपूर्णसरोगर्दं । अन्यथा यातोद्भूतपानतरंगापत्रजलायेन विचलितः समभागोनस्यादित्यर्थः, करतलं प्रतीतं चंद्र [illegible]
सूर्यमंडलंच यद्यपि वस्तुगत्याउत्तानीकृतार्द्धकपित्थाकारपीठप्रासादापेक्षया वृत्तालेखमिति, तद्गतोद्गतसमालो भागोऽपगतलक्षणापि प्रतिभा[illegible]
सपत्ति तदुपादानं आदर्शमंडलं सुप्रसिद्धं ॥ उरब्भचम्मेइवा इत्यादि ॥ अत्रसर्वत्रापि अणेगसंकुकीलगसहस्सविततै इतिपदं योजनीयं । उर[illegible]
वृषभवराह सिंह व्याघ्रछगलाः प्रतीताः द्वीपीचित्रकएतेषां प्रत्येकंचर्म अनेकैः शंकुप्रमाणैः कीलकसहस्रैर्यदा महद्भिः कीलकैस्ताडितं प्रायोन[illegible]
भवतिचलनसर्वं सत्ताकयताद्य संभवात् अतः शंकुग्रहणं विततंविततीकृतंताडितमिति भावः । यथा ऽत्यंतं समसमं भवति तथा तस्यापि वन[illegible]
त वंकुसमतानुलिमागः । पुनःकथं भूत इत्याह । नानाविहपंचवण्णेहिं मणीहिंतणेहिं उवसोभिए इतियोगः नानाविधजातिभेदा नाना प्रकारायें [illegible]
नसपयन्मालिनतैकयशोभितः कथंभूतैर्मणिभिरित्याह । आवर्तादीनिमणीनां लक्षणानि तत्रावर्तः प्रतीतः एकस्यावर्तस्य प्रत्यभिमुखः आवर्तः [illegible]
मर्तः श्रेणिलघायिवबिंदुजाताद्ये पंक्तिः तस्याद श्रेणीयोविनिर्गता ऽन्या श्रेणिः सामश्रेणिः स्वस्तिकः प्रतीतः सौवस्तिक पुष्यमाणवैश्य न[illegible]

णाणाविहपंचवण्णेहिं मणीहिं तणेहिं उवसोभिए तंजहा– किण्हेहिं

नानाविधपञ्चवर्णैः मणिभि स्तृणै रुपशोभितः तद्यथा-कृष्णैः (नीलवर्णैर्लोहितवर्णैर्हारिद्रवर्णैःशुक्लवर्णैरिति)

नाना प्रकारना अनेकप्रकारना पंचवर्ण । तथा मणीरत्नकरी तथा तृणेकरी तथा शोभायमान छे तेकहेछे । किसकालोवर्ण (नीलवर्ण तथा लवर्णपीलावर्ण[illegible]

॥टीका॥

दीर्घकाल प्रवैतन्ने वहुंभानकं प्रतानपुर्द वारयोहवनदाहक्के सप्तपर्णविशेषांवके प्रसिद्धे शारमारेति लवण विशेषी सम्यग्विलवण्वेदिती लोका ईरितन्नी पुष्पावलि यस्रव वाणरस्र्नकामंतीमना यस्वनाः प्रतीताः तासांभक्त्याविच्छितया चित्रमालेखोपेपुते तथा किंशुकांभवति आयताहि लवणवेते लवणतो शोभमाना शोभायेवाने नयातेः मध्यमेहि इत्यादि विशेषण द्वयं प्राग्वत्, एवं भूतेनानाविधैः पंचवर्णमंणिभिस्तृणैरोपशो भित कटघोनुवद्धेये कारीः कृष्णवर्णाद्वैनैः एवंवत्संति एवममुना प्रकारेणशेषोपिनीलादिकोवर्णो मणितृणविशेषणतया योजनीयो, यथा नीलवर्णो र्नीलिमवर्णैः हारिद्रवर्णैः शुक्लवर्णैश्च तथा तेषांमणितृणानां गंधः स्पर्शः शब्दश्चनेतव्यः तथा तस्यवनषंडस्य भूमिभागे पुष्करिण्यः पर्वतका गृहका णि मंडपकाः पृथिवी शिलापट्टकाश्च नेतव्या बुद्धिपथं प्रापणीयाः । भवंतिहि सूत्रकाराणां गतेंषिन्न्यादौदृशानिलापवार्यकानि एवं जाव तहेव वत्ताइं य एवमनुमिहताइं १ इति अत्रैव सूत्राभिप्रायाभिव्यक्तये जीवाभिगमादि ग्रंथोक्तः कियान् पाठोलिख्यते तत्थणंजेतेकिण्हामणीतणायतेसिणं अयमेया रूवेवन्नावासेपन्नत्तेसेजहा नामए जीमूते इवा अंजणेइवा खंजणे इवा कज्जलेइवा मासीइवा मसीगुलियाइवा गवलेइवा गवलगुलिया इवा भ मरे इवा भमरावली इवा भमरपत्तसारे इवा जंबूफलेइवा अद्दारिट्ठेइवा परपुट्ठे इवा गएइवा गयकलभेइवा किण्हसप्पेइवा किण्हकेसरेइवा आगास थिग्गलेइवा किण्हासोए इवा किण्हकणवीरेइवा किण्हबंधुजीवे इवा भवेएयारूवे गोयमा-णो इणट्ठे समट्ठे तेणं कण्हामणी तणाय इत्तो इट्ठतराएचेव कंततराएचेव मणुन्नतराएचेव मणामतराएचेव वण्णेणं पण्णत्ता इति, अत्रव्याख्या तत्थणमित्यादि तत्रतेषां पञ्चवर्णानांमणीनां तृणानांच मध्ये णमिति प्रा

॥ मूल ॥ एवं वण्णो गंधो फासो सद्दो ॥ पुक्खरिणीओ पव्वयगा घरगा मंडवगा पुढविसिलावट्टगा य णेयव्वा,

अनुवाद॥ एवं वर्णो गंधः स्पर्शः शब्दः ॥ पुष्करिण्यः पर्वतकाः गृहकाणि मण्डपका पृथ्वीशिलापट्टका च नेतव्याः

॥ भाषा ॥ इमवर्णवंतपणे गंधरसस्पर्शशब्दतेवनभूमिभागेंपुष्करवावीद्रहःपर्वतपर्गृहभवन मांडवापुःपृथ्वीशिलापट्टक एतलीवस्तुसर्वजीवाभिगमसूत्रथीजाणवी ॥

स्यत् येतेकृष्णा मणय स्तृणानिच वेइरंवेषसिद्दैयेते इति वचनं भावाक्रमार्थं। तैसिणमित्यादि सेजहाणामए इयप्रत्रेष सूत्र पूर्ववत्, जीमूतमिथा मे
वृट् प्रारंभ समये जलपूर्णोवेदितश्च:, तत्रैव प्रायोऽतिकालिम संभवात्, इतिशब्दउपमाभूतवस्तुनामपरिसमाप्तिद्योतकः वाशब्दउपमानान्तर
वा समुच्चये, एवं सर्वत्र इति वा शब्दौद्रष्टव्यौ। अंजनं सौवीरांजनं रत्नविशेषोवा खंजनंदीपमल्लिकामलः स्नेहाभ्यक्तशकटाक्षघर्षणोद्भव मित्यपरे च
दीपशिखापतितं मषी तदेवकज्जलं ताम्रभाजनादिषु मागधीविशेषेणघोलितं मषीगुलिका घोलित कज्जलगुटिका गवलंमाहिषंशृङ्गं तदपिचापगा
परितनत्वग्भागंग्राह्यं तत्रैवविशिष्टस्य कालिम्नः संभवात्, तथा तत्रैवमाहिषशृङ्गस्य निबिडतरसारनिर्वर्तिता गुटिका गवलगुटिका भ्रमरः प्रतीतः
रावली भ्रमरपंक्तिः तथा भ्रमरपत्रसारः भ्रमरपक्षपत्रं पक्ष तस्य सार सदंतर्गतो विशिष्टश्यामतोपचितः प्रदेशः जंबूफलंप्रतीतं आर्द्रारिष्टः कोमल
परपुष्टः कोकिलः गजोगजकलभश्च प्रसिद्धौ कृष्णसर्पः कृष्णवर्णःसर्पजातिविशेषः कृष्णकेसरः कृष्णबकुलः आकाशथिग्गलं शरदिमेघमुक्तमाकाशख
द्वि कृष्णमतीव प्रतिभातीति तदुपादानं कृष्णाशोक कृष्णकणवीर कृष्णबंधुजीवाः अशोककणवीरबंधुजीववृक्षभेदाः अशोकादयोहि पंचवर्णाभवं
तः शेषव्युदासार्थं कृष्णग्रहणं एतावत्युक्ते भगवंतं गौतमः पृच्छति। भवेएयारूवेइति। भवेत्मणीनां तृणानांच कृष्णोवर्णः एतद्रूपो जीमूतादिरूप
कुपाठाश्रयस्य प्रश्नसूत्रतायेदितस्या भगवानाह-गौतमनायमर्थः समर्थः नायमर्थः उपपन्नो यदुतएवंभूतः कृष्णोवर्णोमणीनां तृणानांच किंतुते कृष्ण
यस्तृणानिवहतो जीमूतादेः मकाशादिष्टतरका एव कृष्णेनवर्णेन इंष्मिततरकाएव तत्र किंचिदकांतमपिकेषांचिदिष्टतरंभवति ततोऽकांततास्य
त्यर्थमाह कांततरका एव अतिस्निग्धमनोहारिकालिमोपचितया जीमूतादेः कमनीयतरका एव, अतएव मनोज्ञतरका मनसाप्राप्यंते अनुकूलतर
प्रवृत्ति विषयी क्रियंते इति मनोज्ञा मनोनुकूलाः ततः प्रकर्ष विवक्षायांतरप् प्रत्ययः तत्र मनोज्ञमपि किंचिन्मध्यमं भवति, ततः मर्वोत्कर्षप्र
तार्थमाह। मन आपतरका एव द्रष्टृणांमनांसि आप्नुवंति आत्मवशतांनयंतीतिमनआपाः ततः प्रकर्ष विवक्षायांतरप् प्रत्ययः प्राकृतत्वात् य
मकारेमआमतरा इति भवति। अथवाकोपिशब्दः कथापि प्रसिद्धो भवतीति नानादेशजविनेयानुग्रहार्थं एकार्थिका एवैतेशब्दा इति॥ तत्यणं
नीलगा मणीतणाय तेसिणं अयमेयारूवे वण्णावासे पण्णत्ते सेजहा सेजहाणामए भिंगेइवा भिंगपत्ते इवा चासेइवा चासपिच्छेइवा सुयइवा सुत्र

इवा चोलीइवा चोलीभेए इवा नीलीगुलिया इवा सामाएइवा उचंतए इवा वणराईइवा हलधरवसणे इवा मोरगीवा इवा पारेवयगीवा इवा अय सिकुसुमे इवा बाणकुसुमेइवा अंजणकेसियाकुसुमे इवा नीलुप्पलेइवा नीलासोए इवा नीलकणवीरे इवा नीलबंधुजीवे इवा भवेएयारूवे गोयमा णो इणट्ठे समट्ठे तेणं नीलामणी तणामणी इट्ठतरयाचेव कंततरयाचेव मणुण्णतरयाचेव मणामतरयाचेव वण्णेणं पण्णत्तेति पदयोजना प्राग्वत् भृंगः कीटविशेषः पतंगः भृंगपत्रं तस्यैव कीटविशेषस्य पक्षम् शुकः कीरः शुकपिच्छं शुकस्य पत्रं प्रसिद्धं चापः पक्षिविशेषः चापपिच्छं तस्यैव पिच्छं नीली प्रसिद्धा नीलीभेदो नीलीच्छेदः नीलीगुलिका श्यामाको धान्यविशेषः प्रज्ञापनायां तु सामाइति पाठस्तत्र श्यामा प्रियंगुः उच्चंतगो दंतरागः वनराजी प्रतीता हलधरो बलभद्रः तस्य वसनं तद्धि किलनीलं भवति सर्वदैव यतो गौरशरीरस्य शोभाकारीति नीलमेव वस्त्रं परिधत्ते मयूरग्रीवा पारावतग्रीवा अतसीकु सुमबाणकुसुमानि प्रतीतानि अंजनकेशिका वनस्पतिविशेषः तस्याः कुसुमं नीलोत्पलं कुवलयं नीलाशोकनीलकणवीर नीलबंधुजीवा अशोकादिवृक्ष विशेषाः भवे एयारूवे इत्यादि प्राग्वत् व्याख्येयं । तत्थणं जेते लोहियगा मणी तेसिणं इमेयारूवे वण्णावासे पण्णत्ते संजहा सेजहाणामए सस गरुहिरेइवा उरब्भरुहिरेइवा वराहरुहिरेइवा मणुस्सरुहिरे इवा महिसरुहिरे इवा बालिंदगोवएइवा संझब्भरागे इवा गुंजद्धरागे इवा जायहिंगुलि ए इवा सिलप्पवाले इवा पवालंकुरे इवा लोहियक्खमणी इवा लक्खारसे इवा किमिराग कंबले इवा चीणपिट्ठरासी इवा जासुअणकुसुमे इवा किंसुअकुसुमे इवा पालियायकुसुमे इवा रत्तुप्पले इवा रत्तासोए इवा रत्तकणवीरे इवा रत्तबंधुजीवे इवा भवे एयारूवे गोयमा णोइणट्ठे समट्ठे तेणं लोहियगा मणी तणाय इत्तो इट्ठतरयाचेव कंततरयाचेव मणुण्णतरयाचेव मणामतरयाचेव वण्णेणं पण्णत्तेसि । शशकरुधिरं प्रतीतं उरभ्रउरणस्तस्य रु धिरं वराहः शूकरः तस्य रुधिरं मनुष्यरुधिरंच प्रतीतं एतानिहि शेषरुधिरेभ्यो लोहितवर्णोत्कटानि भवंति तेनैषामुपादानं बालेंद्रगोपकः सद्योजा त इंद्रगोपकः सहिप्रवृद्धः सन् ईषत् पांडुरक्तो भवति ततो बालग्रहणं इंद्रगोपकः प्रावृट् कालभावी कीटविशेषः बालदिवाकरः प्रथममुद्गच्छन् सू र्यः सहिरक्तवर्णो भवतीति बालपदोपादानं संध्याभ्ररागो वर्षासु संध्यासमयभावी अभ्ररागः गुंजारक्तिका तस्या अर्द्धस्यरागः गुंजार्द्धरागः गुंजा याहि अर्द्धमतिरक्तं भवति अर्द्धमति कृष्णं अतो गुंजार्द्धग्रहणं जातहिंगुल को व्यक्तं, शिला प्रवालं प्रवालमाणिक्य विशेषः प्रवालांकुरस्तस्यैवांकुर,

मपि प्रथमोद्गतस्तेनारपंतरक्तोभवत्यतस्तदुपादानं लौहिताक्षमणिर्मणिविशेषः लाक्षारसःप्रतीतः कृमिरागेणरक्तःकंबलः कृमिरागकंबलः चीन पिष्टं सिंदूरं तस्यराशिः जपाकुसुमकिंशुककुसुमपारिजातकुसुमरक्तोत्पलरक्ताशोकरक्तकणवीररक्तबंधुजीवाः प्रतीताः । भवेएयारूवे इत्यादि प्रा ग्वत्, तत्थणं जेते हालिद्दगमणी तेसिणं तेसिणं अयमेयारूवे वण्णावासेपण्णत्ते संजहा सेजहाणामए चंपगे इवा चंपगच्छल्ली इवा चंपगच्छेए इवा हलिद्दा इवा हलिद्दाभेए इवा हलिद्दा गुलिया इवा हरियालिया इवा हरियालियागुलिया इवा चिउरेइवा चिउरंगरागे इवा वरकणगे इवा वरक णगनिघसे इवा वरपुरिसवसणे इवा अल्लई कुसुमेइवा चंपगकुसुमे इवा कोहंडियाकुसुमे इवा कोरंटमल्लदामे इवा तडवडाकुसुमे इवा घोसाडिया कुसुमे इवा सुवण्णजूहियाकुसुमे इवा सुहिरण्णिया कुसुमे इवा बीअग कुसुमेइवा पीयासोए इवा पीतकणवीरे इवा पीअबंधुजीवे इवा भवे एयारू वे गोअमा णोइणट्ठे समट्ठे तेणं हालिद्दामणीतणाय एत्तो इट्ठतराचेव जाव वण्णेणं पण्णत्ता ॥ तत्रेत्यादि पदयोजना प्राग्वत्, चंपकः सामान्यतः सुवर्णचंप कोवृक्षः चंपकछल्ली सुवर्णचंपकवल्कल् चंपकभेदः सुवर्णचंपकच्छेदः हरिद्राप्रतीता हरिद्राभेदो हरिद्राच्छेदः हरिद्रागुलिका हरिद्रासारनिर्वर्त्तितागुटि का हरितालिका पृथिवीविकाररूपा प्रतीता हरितालिकाभेदो हरितालिकाच्छेदः हरितालिकागुलिका हरितालिकारसनिर्वर्त्तितागुटिका चिकुरो रागद्रव्यविशेषः चिकुरांगरागः चिकुरसंयोगनिमित्तो वस्त्रादौरागः वरं प्रधानं यत्कनकं पीतसुवर्णमित्यर्थः, वरकनकं तस्य निघर्षः निकषोपलकषपट्टकेरे खारूपः वरपुरुषो वासुदेव स्तस्य वसनं वस्त्रं तद्धि किलपीतमेव भवतीति तदुपादानं अल्लकीकुसुमं लोकतोऽवसेयं चंपककुसुमं सुवर्णचंपककुसुमं कू ष्माण्डिका कुसुमं पुष्पफलीपुष्पं कोरंटकमाल्यदाम कोरंटकः पुष्पजातिविशेषः यद्य कंटासेलिआदयः संभाव्यते तस्यमालायै हितानीति कृत्वामा ल्यानि पुष्पाणि तैर्दाम मालाकुसुमादैर्ग्रथितरूपं भवतीति दाम यद्दृत्तं तडवड आउली तस्याः कुसुमं तडवडा कुसुमं,तथा घोषातकीकुसुमं सुव र्णयूथिकाकुसुमंच प्रतीतं सुहिरण्णिका वनस्पति विशेषः बीजकोवृक्षविशेषः प्रतीतस्तस्य कुसुमं पीताशोकादयोव्यक्ताः शेषं पूर्ववत् ॥ तत्थणं जेते सु क्किलामणीतेसि णं तेसिणं अयमेयारूवे वण्णावासे पण्णत्ते संजहा सेजहाणामए अंके इवा संखेइवा संखचुण्णे इवा कौचावली इवा हारावली इवा ब लायावली इवा चारदयवलाहए इवा धंतधौतरूप्पपट्टे इवा सालिपिट्टरासी इवा कुंदपुप्फरासी इवा कुमुदरासी इवा सुक्कछिवाडिआ इवा पेहु

कन्दलिका इवा सेइया मुणाले इवा गयदंते इवा लवंगदले इवा पोंडरीयदले इवा सिंदुवारमल्लदामे इवा सेताभोए इवा सेअकणवीरे इवा सेअबंधुजीवे इवा भवे एयारूवे गोयमा णोइणट्ठे समट्ठे तेसि णं सुक्किल्लाणं मणीणं एत्तो इट्ठतराए चेव जाव वण्णेणं पण्णत्ता ॥ तत्थाङ्कमित्यादिपदयोजनामाग्वत्, संकोरकविशेष. शङ्खचूर्णं हंसगर्भि कुन्दपुष्पविशेषः दकरजः उदककणाः ते च हिमशिला ... दधिघनो दधिपिण्डः क्षीरं प्रतीतं क्षीरपूरं क्वथ्यमानमतितापादूर्ध्वं गच्छत् क्षीरं क्रौञ्चावलिहारावलिहंसावलि बलाकावलयः प्रकटार्थाः आवलिपदोपादानं वर्णोत्कर्षप्रतिपादनार्थं च तडागोदकादिषु जलमध्ये प्रतिबिम्बिता चन्द्रपङ्क्तिः शारदिकबलाहकः शरत्कालभावी मेघः ध्मातधौतरूप्यपट्टः ध्मातोऽग्निसंपर्कतो अतिनिर्मलीकृतो धौतो भूतिखरण्टित हस्तसम्मार्जनेनातितेजितो रूप्यमयः पट्टः, अन्ये तु- ध्मायते ध्मातेनाग्निसंयोगेन धौतः शोधितो रूप्यपट्टः, शालिपिष्टं शालिचूर्णं लवराशिः पुञ्जः कुन्दपुष्पराशिः कुमुदराशिः स्पष्टः शुष्कच्छेवाडीमवल्लादिफलिका सा च क्वचिद्देशविशेषे शुष्का सती अतीव शुक्ला भवत्यतस्तदुपादानं पेहुणमिं जिका पेहुणं मयूरपिच्छं तन्मध्यवर्तिनी मिंजा साचातिशुक्लेति तदुपन्यासः विसं पद्मिनीकन्दः मृणालं पद्मतन्तुः शेषा गजदन्तादिका उक्तार्थाः नवरं सिंदुवारो निर्गुण्डी तस्य माल्यं दाम प्राग्वत् भवे एयारूवे इत्यादि भावितार्थं तदेवमुक्तं वर्णस्वरूपं॥ संप्रति गंधस्वरूपप्रतिपादनार्थमाह ॥ तेसि णं भंते मणीणं तणाण य केरिसए गंधे पण्णत्ते सेजहा कोट्ठपुडाण वा तगरपुडाण वा एलापुडाण वा चोअपुडाण वा अगरुपुडाण वा दमणगपुडाण वा कुंकुमपुडाण वा चंदण पुडाण वा उसीरपुडाण वा मरुअगपुडाण वा जाइपुडाण वा जूहियापुडाण वा मल्लिआपुडाण वा ण्हाणमल्लियापुडाण वा केअइपुडाण वा पाडलपुडाण वा णोमालियापुडाण वा अगरुपुडाण वा लवंगपुडाण वा वासपुडाण वा कप्पूरपुडाण वा अणुवायंसि उब्भिज्जमाणाण वा कुट्टिज्जमाणाण वा भंजिज्जमाणाण वा उक्किरिज्जमाणाण वा परिभुंजमाणाण वा भंडाओ भंडं साहरिज्जमाणाणं उराला मणुण्णा मणहरा घाणमणणिव्वुइकरा सव्वओ समंता गंधा अभिणिस्सवंति भवे एयारूवे गोयमा णो इणट्ठे समट्ठे तेसि णं मणीणं तणाण य एत्तो इट्ठतराए चेव जाव मणामतराए चेव गंधे पण्णत्ते ॥ तेषां जगतीपद्मवरवेदिकावनषण्ड स्थानां एतेषां मणीनां तृणानां च कीदृशो गन्धः प्रज्ञप्तः, भगवानाह॥ गौतम सेजहाणामए इत्यादि । प्राकृतत्वात् सेइति अथ शब्दार्थः तेषां नाम गृह्णाति या या संस्कारे गन्ध अभिनि। सर्वत्रापि सम्बन्धः, कोष्ठं गन्धद्रव्यं तत्पुटाः कोष्ठपुटा तेषां यासां सर्वत्र सम्बन्धः। इह एकस्य पुटस्य प्रायो गन्धद्रव्यो

गन्धः प्रसरति गन्धद्रव्यस्यान्यत्रत्वात् ततो यद्भवनं तागरमपि गन्धद्रव्यं गुणाः प्रतीताः चोत्रंगन्धद्रव्यं चंपकदमनककुंकुमचंदनोशीरमरुबकजा
तिकामल्लिकायानमल्लिकाकेतकीपाटलानवमालिकाअगरुलवंगवासकर्पूरवत् प्रतीतानि नवरमुशीरं बीरणं मूलं सवज्ञचित् हिरिवेरमुशागट
ति मयजीवेद पुटानां यालपुटानां स्नानमल्लिका स्नानयोग्यामल्लिकाविशेषः एतेषां मनुवाते आघ्रामकविपक्षितपुरुषाघामनुकूलवाते वा
ति उद्भिद्यमानानां सुद्वाट्यमानानां निर्भिद्यमानानां नितरामतिशयेन भिद्यमानानां कोटिक्रमणोयया इति इहपुटैः परिमितानि यानि द
व्याणि तान्यपि परिमेव परिमाणोपचारात् कोटपुटादीनी रयुष्यते तेषां कुट्यमानानां मुद्गरलादिभुद्धगानानां श्लक्ष्णमाणोणया इति
संहीक्रियमाणानां यत्र त्रिशिवणद्रव्यं कोष्ठादि द्रव्याणामयमेवं तेषांमापः कुट्टन महत्खंडीकरण संभवात् ननु पूर्विकादीनां तथावकीर्यमाणानां
कादिभिः कोशादिपुटानां कोशादिद्रव्याणां वा उत्क्षिप्यमानानां तयाविकीर्यमाणानां मितस्ततो विप्रकीर्यमाणानां परिभुज्यमानानां परिभोगार्थं
उपभोगानां क्वचित् परिभाज्यमानानामिति पाठस्तत्र परिभाज्यमानानां पार्श्ववर्तिभ्योमनाक् मनाक् दीयमानानां तथाभांडात् स्थानादेक
स्थानं संचार्यमाणानां उदाराः स्फारास्तेषाऽमनोज्ञानपि स्यंत्यत आह, मनोज्ञामनोनुकूलाः तच्चमनोज्ञत्वं कुत इत्याह, मनोहरा
हरंत्यात्मवशं नयंतीति मनोहरा यतस्ततो मनोज्ञा सादपि मनोहरत्वं कुत इत्याह घ्राणमनोनिर्वृतिकराः नासासविषयचेतःसुखोत्पाद
कत्वात् सर्वतः दिक्षु समंततः सामस्त्येन गंधा अभिनिःस्रवंति जिघ्रतामभिमुखं निस्सरंति एवमुक्तेशिष्यः पृच्छति भवेदेतद्रूपः भगवानाह-गं
नायमर्थः समर्थः तेषां मणीनां तृणानां इतस्तरकश्चैव यावन्मन आपतरकश्चैव गन्धः प्रज्ञप्त इति ॥ तेसिणं भंते मणीणं तणाणय केरिसए
फासे पण्णत्ते गोयमा से जहा णामए आइणगेइ वा रूए इवा बूरेइवा णवणीए इवा हंसगब्भतूली इवा सिरीसकुसुमनिचए इवा बालकुसुमपत्तरासी इवा भवे ए
ते गोयमा णो इणट्ठे समट्ठे तेसिणं मणीणं तणाणय इत्तो इट्ठतरएचेव जाव फासेणं पण्णत्ते तेषां भदन्त मणीनां तृणानांच कीदृशः स्पर्शः प्रज्ञप्तः
भगवानाह-गौतम सेजहाणामए इत्यादि ॥ यथा अजिनकं चर्ममयं वस्त्रं रूपं कर्पासपक्ष्म बूरो वनस्पतिविशेषः नवनीतं ग्रक्षणं हंसगर्भतूली हि
कुसुमनिचय प्रकरः बालानि अचिरकालजातानियानि कुमुदपत्राणि तेषां राशिः क्वचित्ताल्पकुसुमपत्रराशिरितिपाठः भवे एया रूवे इत्यादि पूर्ववत्

तिविधानां नवीनतरावय पुप्पावरादिवुतरागरहिं मारुहिं मंदायं मंदायं एइयायं वेइयायं कंपियायां चालियायं फंदियायं घट्टियायं राभिजा
च उदीरियायं केरिसए सहेयवते गोयमा वेजवावामए सिविया एवा संदमाणिया रहा रहत्तयासव्छतस्स सज्झयस्स सघंटायस्स सपडागस्स सतो
रणवरस्स सनंदिघोसस्स सखिखिणीहेमजालपेरंतपरिक्खित्तस्स हेमवयचित्ततिणिसकणगणिज्जुत्तदारुआगस्स सुपिणद्धारगमंडलधुरागस्स कालाय
स सुकयणेमिजंतकम्मस्स आइण्णवरतुरगसुसंपउत्तस्स कुसलनरछेअसारहिसुसंपग्गहियस्स सरसयबत्तीसतूणपरिमंडियस्स सकंकडावयंसगस्स सचापस
रपहरणावरणभरियजोहजुद्धसज्जस्स रायंगणंसि वा अंतेउरंसि वा रम्मंसि वा मणिकुट्टिमतलंसि अभिक्खणं अभिघट्टिज्जमाणस्स जे उराला मणुण्णा कण्णमणोणिव्वु
इकरा सद्दा सव्वओ समंता अभिणिस्सवंति भवे एयारूवे सिया णो इणट्ठे समट्ठे अत्रव्याख्या, तेषां मणीनां तृणानां च भदन्त पूर्वापरदक्षिणोत्तरागतैर्वातै
र्मंदं मंदं एजितानां तथा व्येजितानां विशेषतः कंपितानामेतदेव पर्यायशब्देन व्याचष्टे कंपितानामिति तथा चालितानामितस्ततो विक्षिप्तानां एतदेव
पर्यायेणाह स्पंदितानामिति तथा घट्टितानां परस्परं घर्षणानां कथं घट्टिता इत्याह क्षोभितानां स्वस्थानाच्चालितानां स्वस्थानाच्चालनमपि कुत इ
त्याह उदीरितानामुत्प्रावल्येनेरितानां, प्रेरितानां कीदृशः शब्दः प्रज्ञप्तः भगवानाह-गौतम सपथानामकः शिविकाया वा स्पंदमानिकाया वा रथस्य वा त
त्र शिबिका जंपानविशेषरूपा उपरिच्छादिता कोष्ठाकारा तथा दीर्घा जंपान विशेषः पुरुषस्य स्वप्रमाणायकाशदायी स्पंदमानिका अनयोश्च शब्दः पुरु
षोत्पाटितयोः क्षुद्रहेमघंटिकादिचलनवशतोवेदितव्यः रथश्चेह संग्रामरथः परिगृह्यते न क्रीडारथः तस्याग्रेतनविशेषणानामसंभवात्, तस्य च फलकवेदि
का यस्मिन् काले वेपुरुषावलद्रपेवणाकटिप्रमाणा सवेया प्रसव रथस्य विशेषणान्यभिधत्ते सच्छत्रस्य सध्वजस्य सघंटाकस्य उभयपार्श्वावलंबिमहाघण्टा
घंटोपेतस्य सपताकस्य सपुष्पजस्य सतोरणवरस्य प्रधानतोरणोपेतस्य सनंदिघोषस्य द्वादशविधतूर्यनिनादोपेतस्य द्वादशतूर्याणि च. भंभा मुकुं
द मद्दलकडंबझल्लरिहुडुक्क । कंसाला काहलतलिमा वंसो संखो पणवो य बारसमो १ तथा सकिंकिणीकहेमजालपर्यंतपरिक्षिप्तस्य सह किंकिणीभिः क्षुद्र
घंटिकाभिः पर्यंतेषु सर्वेषु परिक्षिप्तो व्याप्तः तस्य तथा हैमवतं हिमवत्पर्वतभा
वं चित्रं तिनिसं कनकपट्टिका संवलित नियुक्तं तथाविधं दारु काष्ठं यस्य तस्य

जंबूद्वीप०
भाग॥१६॥
प्रथमद्वार

तस्य प्रथमा [illegible] कृतं [illegible]
मूलभूतस्य तथा कालायसेन लोहेन सुष्ठु अतिशयेन सम्यक् प्रयुक्तायोजिता यस्मिन् सतया तस्य [illegible] च
नियंत्रकर्मा तस्य आकीर्णगुणैर्व्यां [illegible] प्रधानासुरगात्सुष्ठु अतिशयेन सम्यक् परिगृहीतस्य तथा शराणांगतं म
रनिपातः प्राकृतत्वात् तथा सारथिकर्मणि कुशला नराश्चेषां मध्ये अतिशयेनछेकोदक्षः सारथिसंगमनु सम्यक् परिगृहीतस्य तथा शराणांगतं प्र
त्येकं येपुतानि शरगतानि तानि चतानिद्वात्रिंशत्तूणानिव आबाधयाः शरयतद्वात्रिंशत्तूणानितैर्मंडितः किमुक्तं भवति एवंनाम तानि द्वात्रिंशत्शरग
त भृतानि तूणानिरथस्य सर्वतः पर्यंतेषु [illegible] तस्यरणायोपकल्पितरथातीयमंडनाय भवंतीति, तथा कंकटः कवचं अवतंसः शिरस्त्राणं ताभ्यां
सहवर्तते यस्य तथा तस्य सहचापेन ये शरा यानिच कुंतादीनि प्रहरणानि यानिचखेटकादीन्या वरणानि तैभृत. पूर्णंतथा योधानां युद्धं तत्रिनि
र्ता सज्जः प्रमुखी भूतोयः सयोधयुद्धसज्जस्ततः पूर्वपदेन कर्मधारयः तस्य इत्थंभूतस्य राजांगणेवा अंतः पुरेवा रम्येवा मणिकुट्टिमतले मणिबद्धभूमि
तले अभीक्ष्णं पुनःपुनर्मणिकोट्टिमतलप्रदेशैः राजांगणादिप्रदेशैर्वा अभिघट्टिज्जमाणस्सेति अभिघट्यमानस्य वेगेन गच्छतोयेउदारा मनोज्ञाः करणं
[illegible] सर्वतः समंतात् शब्दा अभिनिस्सरंति श्रोतृणामभिमुखं निस्सरंति भवे एयारूवे मिथ्यादृतिस्यात्कथंचिद्भवेदेतद्रूप क्षीणां मणीनां तृणा
[illegible] शब्दः [illegible] समर्थः पुनरपिगौतमःप्राह सेजहाणामए वेआलिआए वीणाए उत्तरमंदामुच्छिआए अंकेसुपइठियाए चंदण
[illegible] पच्चूसकालसमयंसि मंदंमंदं एइयाए वेइयाए चालियाए घट्टियाए फंदियाए खोभियाए उदीरियाए
[illegible] अभिनिस्सवंति भवे एयारूवे सियाणो इणट्ठे समट्ठे अत्रव्याख्या सयथानामकः प्रातःसंध्यायांदेवतादाः
[illegible] तालाभावेप्रवर्तते इति वितालेतालाभावे भवतीति वैतालिकीतस्या वैतालिकायावीणाया उत्तरमंदा
[illegible] इति मूर्च्छिता उत्तरमंदया उत्तरमंदाभिधया गंधारस्वरान्तर्गतया सप्तम्या मूर्च्छनया मूर्च्छिता स्वराः
[illegible] भवति, यथाहि [illegible] मूर्च्छना सोरंधीमधुगंधारा उत्तरगंधाराविअहवइंसापंचमी मुच्छा१ सुद्धतरगा

प्रतीर्ण तलाभो यासु का यासुतास्तथा सुवर्णशुभ्ररजततलाः शुभ्रं रूप्यं तथा वज्रमयाः पाषाणाः येषां ताः तथा वैडूर्यमणिमयानि स्फाटिकपटलमयानि स्फाटिकर
त्नमयानि पार्श्वानि प्रत्यवतटानि तटसमीपवर्त्युच्चप्रदेशा यासां ताः तथा तथा सुखेनावतारो जलमध्ये प्रवेशनं यासु ताः स्ववतारा तथा सुखेनोत्तारो
जलाद्बहिर्निर्गमनं यासु ताः सुखोत्ताराः ततः पूर्वपदेन विशेषणसमासः तथा नानामणिभिः सुबद्धानि तीर्थानि यासां तास्तथा अत्र मणिशब्दस्य परनिपातः प्राकृतत्वात् प्रा
कृतशैलीवशाद्वा चतुष्कोणा इति चत्वारः कोणा यासां ताः तथा दीर्घत्वं च तृतीयाद्वीपादीवा इति सूत्रेण प्राकृतलक्षणवशात्
एतच्च विशेषणं वापी कूपाद्यपेक्षया, तेषामेव चतुःकोणत्वसंभवात् नशेषाणां । आनुपूर्व्येण क्रमेण नीचैर्नीचैस्तरभावरूपेण सुष्ठु प्रतिविशिष्टो जातो वप्रः
केदारो जलस्थानं यासु गंभीरमलब्धतलं शीतलं जलं यासु ताः आनुपूर्व्यसुजातवप्रगंभीरशीतलजला स्तथा तथा संछन्नानि जालैर्नातिरिक्तानि पत्रविसमृणाला
नि यासु ता तथा बहूत्पलकुमुदनलिनसुभगसौगन्धिकपुंडरीकमहापुंडरीकशतपत्रसहस्रपत्राणां फुल्लानां विकस्वराणां केशरैः किंजल्कैः उपचिता भृताः विशेषणस्य विशेष्यात्परनिपातः प्राकृतत्वात् त
था षट्पदैः भ्रमरैः परिभुज्यमानानि कमलानि उपलक्षणमेतत् कुमुदादीनि यासु ताः तथा अच्छेन स्वरूपतः स्फटिकवत् शुद्धेन निर्मलेन आगंतुकमलरहि
तेन सलिलेन पूर्णाः तथा पडिहत्था अतिरेकिता अतिप्रभूता इत्यर्थः देशीशब्दोयं पडिहत्थशब्दमायं अक्षरेषु पंचजाणआद्वयं प्रोतिवचनात् उदाहरणं चात्र
पडिहत्थं णयणं वराइं नवसलिलसुद्धुणायाई ॥ अ हिरेइयं महउयचिंताए मणं सुहं विरहे इति, भ्रमंतो मत्स्यकच्छपाः यत्र ताः पडिहत्थभ्रमन्म
त्स्यकच्छपाः अनेकैः शकुनिमिथुनकैः प्रविचरिता इतस्ततो गमनेन सर्वतो व्याप्ताः ततः पूर्वपदेन विशेषणसमासः एतावाप्यादयः सरस्सरपंक्तिपर्यवसा
ना प्रत्येकमिति एकमेकं प्रतिप्रत्येकं यत्राभिमुख्येप्रतिशब्दो मवीप्सा विवक्षा या:पद्या इत्येकशब्दस्य द्विर्वचनमिति पद्मवरवेदिकाय परिक्षिप्ताः प्रत्येकं
प्रत्येकं वनषंडपरिक्षिप्ताः अपिबोद्धव्याः मात्वमेवकाः काश्चन वापादय आसवमिव चंद्रहासादि परमासवमिवउदकं यासां ताः तथा अप्येककाः वारुणो
दवराः वरसमुद्रस्येव उदकं यासां ताः अप्येककाः क्षीरमिवोदकं यासां ताः अप्येकिकाः घृतमिवोदकं यासां ताः अप्येकिकाः क्षोदरस इक्षुरसस्तद्वदुदकं
यासां ताः अप्येकिकाः अमृतरसमरसं उदकं यासां ताः अमृतरससमरसोदकाः अप्येकिकाः उदकेन स्वाभाविकेन प्रज्ञप्ताः पाताईयादस्यादि प्राग्व

त्। तासि णं खुड्डाणं खुड्डियाणं वावीणं जाव बिलपंतीणं पत्तेयं पत्तेयं चउद्दिसिं चत्तारि तिसोवाणपडिरूवगा पण्णत्ता तेसि णं तिसोवाणपडिरूवगाणं अयमेयारूवे वण्णावासे पण्णत्ते तंजहा वइरामया णेमा रिट्ठामया पइट्ठाणा वेरुलियामया खंभा सुवण्णरुप्पमया फलगा वइरामया संधी लोहियक्खमईओ सूईओ णाणामणिमया आलंबणा आलंबणबाहाओ पासाईया ४ इति। अथ व्याख्या तासां क्षुद्राणां क्षुद्रिकाणां यावद्बिलपंक्तीनां प्रत्येकंप्रत्येकं चतसृणां दिशां समाहारश्चतुर्दिक् तस्मिंश्चतुर्दिशि चत्वारि एकैकस्यां दिशि एकैकभावात् त्रिसोपानप्रतिरूपकाणि तथा प्रतिविशिष्टं रूपं येषां तानि प्रतिरूपकाणि सोपानानां समाहारस्त्रिसोपानं त्रिसोपानानि च तानि प्रतिरूपकाणि चेति विशेषणसमासः विशेषणस्य परनिपातः प्राकृतत्वात् तानि प्रज्ञप्तानि तेषां च त्रिसोपानप्रतिरूपकाणां अयं एतद्रूपो वर्णकनिवेशः प्रज्ञप्तः तद्यथा वज्ररत्नमया नेमा भूमेरूर्द्ध्वं निःक्रामंतः प्रदेशाः रिष्टरत्नमयानि प्रतिष्ठानानि त्रिसोपानमूलपादाः वैडूर्यमयाः स्तंभाः सुवर्णरूप्यमयानि फलकानि त्रिसोपानांगभूतानि वज्ररत्नमयाः पूरिताः संधयः फलकद्वयापांतरालप्रदेशाः लोहिताक्षमय्यः सूचयः फलकद्वयसंबंधविघटनाभावहेतुपादुकास्थानीयाः नानामणिमया अवलंब्यते इति अवलंबा अवतरतामुत्तरतां चालंबनहेतुभूताः अवलंबनबाहातो विनिर्गताः केचिदवयवाः अवलंबनबाहा अपि नानामणिमय्यः अवलंबनबाहा उभयोः पार्श्वयोः अवलंबनाश्रयभूता भित्तयः पासाईयाओ ४ इत्यादि पदचतुष्टयं प्राग्वत्, तेसि णं तिसोवाणपडिरूवगाणं पुरओ पत्तेयंपत्तेयं तोरणा पण्णत्ता तेसि णं तोरणाणं अयमेयारूवे वण्णावासे पण्णत्ते तेणं तोरणा णाणामणिमया णाणामणिमएसु खंभेसु उवणिविट्ठसंनिविट्ठा विविहमुत्तंतरोवचिया विविहतारारूवोवचिया ईहामियउसभतुरगणरमगरविहगवालगकिंनररुरुसरभचमरकुंजरवणलयपउमलयभत्तिचित्ता खंभुग्गयवरवइरवेइयापरिगयाभिरामा विज्जाहरजमलजुयलजंतजुत्ता विव अच्चीसहस्समालणीया रूवगसहस्सकलिया भिसमाणा भिब्भिसमाणा चक्खुलोयणलेसा सुहफासा सस्सिरीयरूवा पासाईया ४ इति व्याख्या, तेसि णमित्यादि तेषां त्रिसोपानप्रतिरूपकाणां पुरतः प्रत्येकं प्रत्येकं तोरणानि प्रज्ञप्तानि तेषां तोरणानां अयमेतद्रूपो वर्णावासो वर्णकनिवेशः प्रज्ञप्तः तद्यथा तेणं तोरणा इत्यादि तानि तोरणानि नानामणिमयानि मरकतचंद्रकांतादयः विविधमणिमयानि नानामणिमयेषु स्तंभेषु उपविष्टानि सामीप्येन स्थितानि तानि च कदाचिच्चलानि अथवा ऽपदपतितानि भवेयुः ततआह सम्यग्निश्चलतया ऽपदपरिहारेण च निविष्टानि ततो विशेषणसमासः

॥टीका॥

विविधा मणयो विचित्रमणिकल्पिता मुक्ताः मुक्ताफलानि अंतरान्तरोपशोभितानि येषां तानि तथा श्रंतरांतरालेष्विति आपूरिताः आरोपिता यत्र तानि तथा
विविधैः तारारूपैः तारिकाकारैः रूपकितानि तोरणेषु हि शोभार्थं तारकाणि निबध्यंते इति प्रतीतं लोकेपि ईहामृगा वृकाः ऋषभा वृषभाः व्याला भुजगाः
नराः मृगविशेषाः शरभाः अष्टापदाः चमराः आटव्यागावः वनलताः अशोकलताद्याः पद्मलताः पद्मिन्यः शेषाः प्रतीताः एतासां भक्त्या विच्छित्त्या चि
त्र आलेख्यो येषु तानि तथा स्तंभोद्गतया स्तंभोपरि वर्तिन्या वज्ररत्नमय्या वेदिकया परिगतानि परिकरितानि संति यानि अभिरमणीयानि तथा वि
द्याधरयोः विशिष्टशक्तिमत्पुरुषविशेषयोः यमलं समश्रेणीकं युगलं द्वंद्वं तेनेव यंत्रेण संचरिष्णु पुरुषप्रतिमाद्वयरूपेण युक्तानि अर्चिःसहस्रैः दीप्यमानाः
तथा अर्चिषां सहस्रैः मालनीयानि रूपकसहस्रकलितानि स्पष्टं भिसमाणाइति दीप्यमानानि भिब्भिसमाणा इति अत्यर्थं दीप्यमानानि
तथा चक्षुःकर्णलोकने अवलोकने श्लिष्यतीव दर्शनीयत्वातिशयतः श्लिष्यतीव यत्र तानि तथा सुहफासाइति शुभस्पर्शानि सश्रीकानि सशोभाकानि रूपा
णि यत्र तानि सश्रीकरूपाणि पासाईयाइत्यादि विशेषणचतुष्टयं प्राग्वत् तेसिणं तोरणाणं उप्पिं अट्ठट्ठमंगलगा पण्णत्ता सोत्थिय १ सिरिवच्छ २ नंदि
यावत्त ३ वद्धमाणग ४ भद्दासण ५ कलस ६ मच्छ ७ दप्पण ८ सव्वरयणामया अच्छा जाव पडिरूवा व्याख्यात्वा, तेषां तोरणानामुपरीत्यादिसुगमं न
वरं जाव पडिरूवा इति यावत्करणात् सण्हा मट्ठा नीरया इत्यादिग्रहः तेसिणं तोरणाणं उप्पिं किण्हचामरज्झया नीलचामरज्झया लोहियचामरज्झया
हालिद्दचामरज्झया सुक्किलचामरज्झया अच्छा सण्हा रुप्पपट्टा वइरदंडा जलयामलगंधिया सुरम्मा पासाईया इति, तेषां तोरणानामुपरि बहवः कृष्ण चा
मरयुक्ताः ध्वजाः कृष्णचामरध्वजाः एवं बहवो नीललोहितहारिद्रशुक्लचामरयुक्ताः ध्वजाः वाच्याः कथंभूता एते सर्वे पीत्याह अच्छा सण्हाइति स्पष्टं रू
प्यमयो वज्रमयस्य दंडस्योपरि पट्टो येषां ते तथा वज्रो वज्रमयो दंडो कायपट्टमध्यवर्ती येषां ते तथा जलजानामिव पद्मानामिवामलो सुकुमाररूपः गंधः
स्निग्धो येषां मवित्थले येषांते जलजामलगंधिकाः अतोऽनेकरवरादिशोकमन्यःअतएव सुरम्याःपासादीयाइत्यादि प्राग्वत् तेसिणंतोरणाणं उप्पिं ब
हवे छत्ताइं छत्ताइच्छत्ताइं पडागा घंटाजुयला चामरजुयला उप्पलहत्थगा पउमहत्थगा जाव सहस्सपत्तहत्थगा सव्वरयणामया अच्छा जाव पडिरूवा
इति सुगमाः छत्रातिछत्राणि छत्रोपरि त्रिसंख्यानि त्रिसंख्यानि वा छत्रातिछत्राणि पताकाः पताकातो

ऽनिशाविन्यो दीर्घत्वेन विस्तरेणेव पताकाः पताकातिपताकाः बहूनि घंटायुगलानि बहूनि चामरयुगलानि बहवः उत्पलहस्तकाः उत्पलाख्यजलज कुसुमसमूह विशेषाः एवं पद्महस्तकाः बहवो नलिनहस्तकाः बहवः सुभगहस्तकाः बहवः सौगंधिकहस्तकाः बहवः पुंडरीकहस्तकाः बहवः शतपत्र हस्तकाः बहवः सहस्रपत्रहस्तकाः उत्पलादीनां व्याख्यानं प्राग्वत्, एतेच छत्रातिछत्रादयः सर्वेपि सर्वरत्नमया जाव पडिरूवा इति, यावत्करणात् अच्छा सण्हा लण्हा इत्यादि विशेषण कदंबकपरिग्रहः ॥ अथ पर्वतकसूत्रं । यथा तासिणं खुड्डियाणं वावीणं जाव बिलपंतियाणं तत्थतत्थ देसे तहिंतहिं बहवे उप्पायपव्वया नियइपव्वया जगईपव्वया दारुपव्वयगा दगमंडवगा दगमंचगा दगमालगा दगपासाया उसडा खुड्डा अंदोलगा पक्खंदोलगा सव्व रयणामया अच्छा जाव पडिरूवगा । अत्रव्याख्या । तासां क्षुल्लिकानां वापीनां यावद्बिलपंक्तीनां । अत्र यावत् करणात् पुष्करिण्यादिग्रहः अपान्तरालेषु त-त्रतत्रदेशे तस्मिंस्तस्मिं इति तस्यैव देशस्य तत्रतत्रैकदेशे बहव उत्पातपर्वताः यत्रागत्य बहवो व्यंतरदेवा देव्यश्च विचित्रक्रीडानिमित्तं वैक्रियशरीरमा रचयंति नियत्या नैयत्येन पर्वताः, क्वचिन्नियय पव्वयातिपाठः तत्र नियताः सदाभोग्यत्वेन स्थिताः पर्वताः यत्र व्यंतरदेवदेव्यो भवधारणीयेन वैक्रियशरीरेण प्रायः सदा रमंते इतिभावः । जगतीपर्वताः पर्वतविशेषाः दारुपर्वतका दारुनिर्मापिता इव पर्वतकाः दकमंडपकाः स्फटिकमंडपकाः दकमंचकाः दकमालकाः दकप्रासादाः, एतेच दकमंडपकादयः केचित् उत्सृता उच्चा इत्यर्थः । केचित् खुड्डा लघवः क्वचित् खुड्डखुड्डगा इतिपाठः । क्षुल्लक्षुल्लका अतिलघवः आयताश्च तथा अंदोलकाः पक्खंदोलकाश्च तत्र यत्रागत्य मनुष्या आत्मानमान्दोलयंतीति अंदोलका इति लोके प्रसिद्धाः „ यत्र पक्षिणः समागत्यागत्य आंदोलयंति तेपक्खंदोलकाः तेचांदोलकाः पक्खंदोलकाश्च तस्मिन् वनखंडे तत्रतत्र प्रदेशे वानमंतरदेवदेवीक्रीडायोग्या बहु-वः संति, तेचोत्पातपर्वताः सेचोत्पातपर्वतादयः कथंभूता इत्याह । सर्वरत्नमया अच्छा इत्यादि विशेषणजालं प्राग्वत् । तेसुणं उप्पायपव्वएसु जाव प-क्खंदोलएसु बहूइं हंसासणाइं कोंचासणाइं गरुलासणाइं उण्णयासणाइं पणयासणाइं दीहासणाइं भद्दासणाइं पक्खासणाइं मगरासणाइं पउमासणाइं सीहासणाइं दिसासोवत्थियासणाइं सव्वरयणामयाइं अच्छाइं जाव पडिरूवा इति । अत्रव्याख्या । तेषुउत्पातपर्वतेषु यावत्पक्खंदोलकेषु अत्र यावत्करणात् नियत पर्वतादिपरिग्रहः, बहूनि हंसासनानि तत्र येषां आसनानामधोभागे हंसाव्यवस्थिताः, यथा सिंहासनानि हंसासनानि एवं क्रौं-

